**PAPER - 2**

# MT

**2017 .... .... 1100**

**Seat No.** |  |  |  |  |  |  |  |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - II**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

सूर्यखगः अर्जुनं वृक्षशाखां छेत्तुं निषेधयति, यतः ....................

a) तस्यां शाखायां निबद्धे नीडे तस्य शावकाः सुप्ताः ।

b) सः वृक्षः विषयुक्तः आसीत् ।

(ii) पूर्णवाक्येन उत्तरं लिखत । १

अर्जुनः किमर्थं वृक्षशाखां छेत्तुं प्रारेभे ?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

प्रयोजनं विना अपि वृक्षशाखा छेत्तव्या ।

एकदा श्रेष्ठो धनुर्धारी अर्जुनः विहारार्थं निबिडारण्यं जगाम । जनसमाकुलान्नगराद् दूरं गत्वा सः मनःशान्तिमनुभवितुमैच्छत् । वने विहरन् चण्डातपेन तप्तः सः वीजनार्थं वृक्षशाखां छेत्तुं प्रारेभे । तदैव कोऽपि सूर्यखगः तत्रागत्य तस्य हस्ते उपविश्य तं प्रार्थयामास - ''हे धनुर्धर, न छेत्तव्या शाखासौ यतः शाखायामस्यां निबद्धे नीडे मम शावकाः सुप्ताः । महता कष्टेन निर्मितमेतन्नीडं मया । मामनुग्रहीतुमर्हति भवान् ।'' तस्य वचनं श्रुत्वा करुणार्द्रहृदयः अर्जुनः तमुवाच, ''मा कातरो भव । न पीडयामि त्वां तव शावकान् वा ।'' ततः अपरस्य वृक्षस्य शाखां छेत्तुं प्रवृत्तस्य अर्जुनस्य हस्तस्योपरि काश्चन पिपीलिकाः वृक्षादपतन् । ता अपि अर्जुनं प्रार्थयन्त, ''हे स्वामिन्, एतासु शाखासु पर्णबद्धाः कन्दुकाकाराः अस्माकं निलयाः । तदाश्रिताः अस्माकं शावकाः अस्माकं राज्ञी सेवकाश्च । किं बहुना, शाखाच्छेदनेन वयं सर्वे निराश्रयाः भवेम । अस्मान् उपकरोतु भवान् । आपत्काले त्वां ध्रुवं साहाय्यं करिष्यामः ।'' पिपीलिकानामभ्यर्थनामाकर्ण्य अर्जुनस्तस्मात् स्थानात् प्रातिष्ठताचिन्तयच्च, ''क्षुद्राः जन्तवः एते सूर्यखगाः पिपीलिकाः । कथं मम साहाय्यकारिणः भविष्यन्ति । अहं तु शक्तिमान्, शस्त्रधारी, निपुणयोद्धा च ।''

**२. स्वमतप्रकटनम् ।** २

मानवजीवने प्राणिनां साहाय्यं कथं भवति इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

अवैधाचारेण ............. कार्यसिद्धिः भवति किन्तु तेन ............ स्वाधिकारवञ्चिताः भवन्ति । (सामान्यजनानां / भ्रष्टजनानां) (सामान्यजनाः / भ्रष्टजनाः)

(ii) पूर्णवाक्येन उत्तरत । १

कीदृशाः जनाः अङ्गुलिमात्रगणनीयाः ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

न्याय्यमार्गानुसारिणः बहुसङ्ख्यया सन्ति ।

कुमारः - श्रुतः मया शब्दोऽयम् । किन्तु तस्य समग्रार्थः न ज्ञातः ।

जनकः - श्रुणु तर्हि । केवलं स्वार्थसिद्धये अनुष्ठितं विधिविरुद्धमाचरणं नियमातिक्रमणं, निषिद्धाचरणं नाम अवैधाचारः ।

कुमारः - स्वकार्यस्य सत्वरसिद्ध्यर्थं केचन जनाः तेषु तेषु कार्यालयेष्वधिकमूल्यं ददति इति श्रुतं मया । किमेष अवैधाचारः ?

जनकः - अथ किम् । महानेष अपराधः । यतः तेन विधिभङ्ग भवति अवैधाचारेण भ्रष्टजनानां कार्यसिद्धिः भवति किन्तु तेन जनसामान्याः स्वाधिकारवञ्चिताः भवन्ति । कार्यसिद्ध्यर्थं वैधाचारः उचितः । अतः कस्यापि वस्तुनः निश्चितमूल्यं दत्त्वैव क्रयणमुचितम् ।

कुमारः - किन्तु भवत्सदृशानां केषांचिज्जनानामेव मतिरेषा । न्याय्यपथानुसारिणः सत्यमार्गगामिनः तु कार्यसिद्धिः नित्यमेव कष्टसाध्या भवति । अङ्गुलिमात्रगणनीयानां धीराणां न्याय्यमार्गानुसारेण किम् ?

जनकः - जात, पश्य एकोऽपि चन्द्रमाः तमो हन्ति विश्वं धवलयति च । एवमेव एकोऽपि सत्यगामी मनुजः समस्तं जनसमूहं प्रेरयति । न्याय्यपथगामिनः विरलाः जनाः समाजं परिवर्तयितुं समर्थाः। यथा दीपेनैकेन दीपमाला प्रज्ज्वाल्यते तथा एकस्य वैधाचारेण अन्ये जनाः वैधाचारिणः भवेयुः।

कुमारः - ज्ञातं मया, तात । अद्यप्रभृति वैधमार्गमेवानुसरामि ।

**२. पृथक्करणम् ।** २

**मञ्जूषातः उचितान् शब्दान् चित्वा स्तम्भपूरणं कुरुत ।**

| अवैधाचारिणः | वैधाचारिणः |
|---|---|
| | |

१) अधिकमूल्यं दत्त्वा कार्यसिद्धिं न कुर्वन्ति ।
२) वस्तुनः निश्चितमूल्यं न ददति ।
३) जनसमूहान् प्रेरयन्ति ।
४) सहजतया कार्यसिद्धिः ।

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

१) श्रुत्वा, आकर्ण्य, निशम्य, वीक्ष्य

२) समुद्रः, सागरः, नदी, तोयनिधिः

(ii) गद्यांशात् विशेषणे चित्वा लिखत । १

......... , ......... यात्री ।

(iii) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-अव्यये लिखत । १

अन्येद्युः साशङ्कमनाः स गङ्गातीरं गत्वा गङ्गानदीं पृष्टवान्, हे गङ्गादेवि, अहर्निशं जनानां पापक्षालनं करोषि । तेन भवत्याः जलं निश्चितं पापमयं वर्तते । तर्हि भवती अस्य पापमयजलस्य किं करोतीति? तन्निशम्य गङ्गा उक्तवती, रे यात्रिन् यदाऽहं सागरं मिलामि तदा सर्वमेतत्पापमयं जलं तस्मिन्नेव उत्सृजामि । अनन्तरं तस्य किं भवतीति न जानेऽहमिति। तदा तद् ज्ञातुमुत्सुकोऽसौ यात्री सागरतीरं गतवान् तत्र च सागरं पृष्टवान्, रे सागर, सर्वाः नद्यः स्वजलस्थितं पापं त्वयि निक्षिपन्ति । तेन त्वं पापाकरः वा पापधिरेव भवसि न वेति। सागर उक्तवान्, न हि, यदा नद्यः पापमानयन्ति तदहं गृह्णामीति सत्यम् । किन्तु सूर्यकिरणैः तस्य जलस्य बाष्पं भवति । बाष्पीभूतस्य पापजलस्य तदनन्तरं किं भवतीति न जाने इति । तच्छ्रुत्वा अतीवोत्कण्ठितः स सागरतीरे स्थित्वैव अवलोकयितुमारब्धवान् । तेन दृष्टं तस्य बाष्पस्यैव मेघो भवति । अतः स यात्री मेघं पृष्टवान्, रे मेघ, अस्य पापस्य किं करोषीति ?

**२. पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) नदी सागरे पापजलम् उत्सृजति ।

(ii) बाष्पस्य मेघं भवति ।

(iii) मानवाः नद्यां पापं क्षालयन्ति ।

(iv) सागरजलस्य बाष्पं भवति ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

समीपमाराधनमन्दिरं च सेन्ट्-चेपलं विश्रुतमस्ति नाम ।
मूर्ध्नोऽस्य तीक्ष्णस्तनुरग्रभागो नभस्थितं दर्शयतीव देवम् ।।१।।
विख्यातनाम्नी खलु जोनदेवी सुमार्गमध्येऽस्ति तदीयमूर्तिः ।
अश्वाधिरूढा स्वकरे गृहीत्वा ध्वजं समुत्तोल्य विराजते सा ।।२।।
यस्यामनेका खलु सेतुबन्धैः विराजते सीनसरित्सुबद्धा ।
नदीं पुरी सापि नदी पुरीञ्च परस्परं भूषयतोऽत्र मन्ये ।।३।।

**१. पृथक्करणम् ।** २

(i)




(ii)




**२. शब्दज्ञानम् ।**

समूहेतरपदं लिखत । १

१) विख्यातः, प्रख्यातः, कुख्यातः, सुप्रसिद्धः - .......... ।

२) आकाशम्, गगनम्, नभः, पयः - .......... ।

**प्र.२ ब) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं, न वायसः
गजश्च सिंहस्य बलं न मूषकः ।।१।।
उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च ।।२।।

**१. अवबोधनम्।**

पूर्णवाक्येन उत्तरत । १

सिंहस्य बलं कः वेत्ति? कः न?

**२. तात्पर्यलेखनम् ।** २

कानि परवस्तूनि न उपयोजितानि इति द्वितीयश्लोकस्य आधारेण लिखत ।

**प्र.२ क) स्मरणम् ।** २

**सुभाषितं शुद्धं पूर्णं च लिखत । (केवलं १ श्लोकः लेखनीयः ।)**

(i) गुणी .......... मूषकः ।।

(ii) उपानहौ ..........करकमेव च ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| (i) अनुग्रहश्च दानं च | त्रिभी रोगो न जायते । |
| (ii) अत्यम्बुपानान्न विपच्यतेऽन्नं | धेनुपन्नगयोरिव । |
| (iii) पात्रापात्रविवेको हि | शीलमेतत्प्रशस्यते । |
| (iv) याममध्ये रसोत्पत्तिः | निरम्बुपानाच्च स एव दोषः । |
| | यामयुग्माद्बलक्षयः । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र. ३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | द्वितीया बहुवचनम् | सप्तमी एकवचन | प्रथमा एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(अस्मान्, धनुर्धारी, अस्याम्, शावकान्, असौ, शाखायाम्)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | विध्यर्थः | वर्तमानकालः | आज्ञार्थः |
|---|---|---|---|---|---|
| | | | | | |

(स्यात्, विराजते, उवाच, भविष्यन्ति, उपकरोतु, ऐच्छत्)

**इ) समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**विग्रहवाक्यानां समासनामाभिः सह मेलनं कुरुत ।**

| | **विग्रहवाक्यानि** | **समासनामानि** |
|---|---|---|
| (i) | उचितं प्रायश्चित्तम् । | अव्ययीभावः |
| (ii) | दिने दिने । | नञ् तत्पुरुषः |
| (iii) | अहः च निशा च एतयोः समाहारः । | बहुव्रीहिः |
| (iv) | न वैधाचारः । | कर्मधारयः |
| (v) | न्यायपन्थानम् अनुसरन्ति इति । | समाहार - द्वन्द्व |
| (vi) | अधुवर्तुलः आकारः यस्य तत् । | उपपद - तत्पुरुषः |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) एष क्रीडाप्रकारः........ कृतेऽपि प्रचलितोऽस्ति । (महिलानां / महिलासु / महिला )

(ii) ....... किमर्थं सहायकपदं दत्तम् । ( तस्मै / तेन / तस्मात् )

(iii) प्रशान्तमनसा स ....... अगच्छत् । (स्वगृहे / स्वगृहस्य / स्वगृहम्)

(iv) निबिडारण्ये पर्यटति तस्मिन् कुतश्चित् मनुजशब्द इव ........ आगतः।
(श्रुतिपथम् / श्रुतिपथात् / श्रुतिपथान् )

(v) ....... पश्चात् अतीव जीवितहानिः भवति । (भूकम्पम् / भूकम्पात् / भूकम्पस्य)

(vi) गुरुः ....... ज्ञानं वितरति । (शिष्यान् / शिष्यैः / शिष्येभ्यः)

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) तस्मिन्नेव = तस्मिन् + ....... ।
(ii) वाग्धारा = ....... + धारा ।
(iii) काश्चिच्च = ....... + च ।
(iv) ....... = रोगाः + तस्य ।
(v) अप्यद्य = ....... + अद्य ।
(vi) ....... = दत्त्वा + एव ।

**ऊ) सङ्ख्यावाचकविशेषणानि । रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) ............राजानं गत्वा नागार्जुनः प्रार्थयामास । (once)
(ii) ............ क्रीडापटवो बहिस्तिष्ठन्ति । (5)
(iii) .................. रसाः ख्याताः । (9)
(iv) शाकुन्तलस्य .................. अङ्कः अतीव सुन्दरः अस्ति । (4th )
(v) देवक्याः .................. अपत्यं नाम भगवान् श्रीकृष्णः । (8th)
(vi) मम मातामही दिनस्य .................. औषधं सेवते । (twice)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| बालकाः | रमणीयाः | नृत्यन्ति । |
| वृक्षाः | सानन्दं | गमिष्यामि । |
| अहं | क्षारं | दृश्यन्ते । |
| समुद्रजलं | काशीं | विद्यते । |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

सुनीता अनीता च माधवदासस्य द्वे कन्ये । सुनीतायाः पतिः मालाकारः तथा अनितायाश्च कुम्भकारः। एकदा सुनीता पित्रे कथितवती तात, प्रभूतं पर्जन्यः ....... इति मे इच्छा येन अस्माकं वनस्पतयः पर्याप्तं जलं ....... । तच्छ्रुत्वा अनीता अवदत्, न, न, तात, अहं तु चण्डातपं कामये येन अस्माकं मृद्घटाः ....... स्युः। उभयोः कामनाम् ....... माधवदासः तूष्णीं स्थितः। मनसि अवदत्, 'अहमत्र किं वदामि?'

(वर्षतु, आकर्ण्य, प्राप्स्यन्ति, सुरक्षिताः)

**Best of Luck**